# rmad-Bhartharih Ngea ca

Autor(en): **Pt. V.B. Bhagavat**

Objekttyp: **Article**

Zeitschrift: **Asiatische Studien : Zeitschrift der Schweizerischen Asiengesellschaft = Études asiatiques : revue de la Société Suisse-Asie**

Band (Jahr): **47 (1993)**

Heft 1: **Proceedings of the first international conference on Bhartrhari : University of Poona, January 6 - 8, 1992**

PDF erstellt am: **12.07.2024**

Persistenter Link: https://doi.org/10.5169/seals-147001

**Nutzungsbedingungen**
Die ETH-Bibliothek ist Anbieterin der digitalisierten Zeitschriften. Sie besitzt keine Urheberrechte an den Inhalten der Zeitschriften. Die Rechte liegen in der Regel bei den Herausgebern.
Die auf der Plattform e-periodica veröffentlichten Dokumente stehen für nicht-kommerzielle Zwecke in Lehre und Forschung sowie für die private Nutzung frei zur Verfügung. Einzelne Dateien oder Ausdrucke aus diesem Angebot können zusammen mit diesen Nutzungsbedingungen und den korrekten Herkunftsbezeichnungen weitergegeben werden.
Das Veröffentlichen von Bildern in Print- und Online-Publikationen ist nur mit vorheriger Genehmigung der Rechteinhaber erlaubt. Die systematische Speicherung von Teilen des elektronischen Angebots auf anderen Servern bedarf ebenfalls des schriftlichen Einverständnisses der Rechteinhaber.

**Haftungsausschluss**
Alle Angaben erfolgen ohne Gewähr für Vollständigkeit oder Richtigkeit. Es wird keine Haftung übernommen für Schäden durch die Verwendung von Informationen aus diesem Online-Angebot oder durch das Fehlen von Informationen. Dies gilt auch für Inhalte Dritter, die über dieses Angebot zugänglich sind.

Ein Dienst der *ETH-Bibliothek*
ETH Zürich, Rämistrasse 101, 8092 Zürich, Schweiz, www.library.ethz.ch

**http://www.e-periodica.ch**

वा. बा. भागवत, पुणे

# श्रीमद्भर्तृहरिः नागेशश्च

तत्रभवान् भर्तृहरिः यथा महावैयाकरणः, एवं महान्तत्त्वज्ञो ऽपि । तेन विरचिते वाक्यपदीये यद्यपि आपाततो व्याकरणशास्त्रविषयाणां विवरणं प्रतिभासते, तथापि चिरायाभ्यासकस्य संदिग्धे मतिः 'किमिदं व्याकरणग्रन्थरत्नमुताहो तत्त्वज्ञानपरमिति'। प्रथमे द्वितीये विशिष्य च तृतीये काण्डे अनेन महाप्रज्ञेन महाभागेन विचारितान् समर्थितांश्च जातिद्रव्यगुणकालादीन्समीक्ष्य कोऽपि प्रेक्षावान्विपश्चित् सर्वथा तत्त्वज्ञानग्रन्थो ऽयमित्येव निश्चिनुयात् । एवंस्थितेऽपि शब्दस्यात्मभूतमर्थतत्त्वं विस्तरेण लक्षणप्रमाणपूर्वकं विमर्शयितुम् इदंप्रथमतया प्रवृत्तमिदं वाक्यपदीयं भाषास्वरूपाभ्यासकानां नितराम् उपकारकं व्याकरणस्य कात्स्न्यमित्यत्र न कोऽपि संशयीत । व्याकरणनिकाये सांप्रतं श्रीमद्भर्तृहरियुगं प्रचकास्ति । सांप्रतिकानां विश्वस्मिन्विश्वे भाषाविशेषाभ्यासकानां विद्वद्वराणां तत्रभवति भर्तृहरौ श्रद्धाविशेषं प्रतीत्य प्राचीना शास्त्रपरंपरा संतोषातिशयं समनुभवति ॥

यद्यप्ययं विद्वान्वाक्यपदीयस्य द्वितीयकाण्डस्यान्ते खण्डितां व्याकरणशास्त्रपरंपरां स्मारं स्मारमनुशोचति, तां च पुनः संजीव-यितुमयमागमसंग्रहः कृत इति प्रतिजानीते, तथापि तममुमागमसंग्रहं स्वाध्यायपरंपरायां द्रढयितुं प्राय उदासांचक्रिरे भर्तृहरेरुत्तराः

पाणिनीयाः । तत्र च उदासनायां निदानं जिज्ञासमानेन मया पाणिनीयव्याकरणपरंपरायां शेखरायमाणः तत्रभवान् पातञ्जले महाभाष्ये कृतभूरिपरिश्रामः नागेशभट्टः पृष्टः, यतः पाणिनीयपरंपरायां यानि मतानि, ये वा सिद्धान्ताः, तेषां समेषामग्र्यया बुद्ध्या परीक्षणे स एव सर्वथालंभविष्णुः इति मन्वेऽहम् ॥

अयं नागेशः स्वग्रन्थेषु बहुत्र श्रीमद्भर्तृहरिसंदर्भान् नामग्राहमन्यथा वा प्रमाणरूपेण समर्थनार्थम्, दूष्यत्वेन निराकर्तुं वा निर्दिशति । बहुत्र वाक्यपदीयकारिकाः महाभाष्यदीपिकावाक्यानि निर्दिशन् अयं वाक्यपदीयमिव दीपिकामपि साक्षाच्चक्रे इत्यनुमीयते ।

नागेशभट्टः साक्षात्परंपरया वा भर्तृहरिमतानि निर्दिश्य तानि बहुत्र दूषयति तत्र कानिचनात्र उदाह्रियन्ते ।

I. महाभाष्ये पस्पशायामुपक्रमे शब्दस्वरूपविचारणायां 'सामान्यभूतं' विवरणावसरे दीपिकायां तत्रभवान्भर्तृहरिः विवृणोति 'भूतशब्द उपमानवाची' इति । अत्र विवरणे तत्रभवान्कैयटः प्रदीपे सर्वथा समर्थयते दीपिकाविवरणम्, परं नागेशः उद्द्योते द्रढीयः खण्डयति 'एवं हि वृक्षवदाम्र इत्याद्यापत्तेः सामान्यश्रुतेः सर्वसामान्यविषयत्वेन प्रवृत्तायाः संकोचे कारणाभावाच्च नेदं युक्तम्, किन्तु स्वरूपवाची सः । पितृभूत इत्यत्राप्यन्यत्रान्यशब्दप्रयोगः सादृश्यपर इति सादृश्यप्रतीतिर्न त्वस्य सादृश्यवाचकत्वे मानमस्ति ।'

II. 'लृकारस्य लपरत्वं वक्ष्यामि' इति 'तुल्यास्यप्रयत्नं ...' (१.१.९) सूत्रभाष्ये दीपिका "व्याख्यास्यामीत्यर्थः, कथम् ? प्रत्याहारः 'रट् लण्' इति लकारे योऽकारः असौ अनुनासिकः प्रतिज्ञास्यते ।" अत्र उद्द्योते नागेशः "लण्सूत्रस्थस्याकारस्यानुनासिकत्वे 'अतो

ल्रान्तस्य' (७.२२) इति सूत्रे पाणिनिर्लकारं नोच्चारयेत् । प्रत्याहारेणैव निर्वाहात्, तस्मादपूर्वं वचनं कार्यमित्येव भाष्याशयः ।"

III. अनेकार्थशब्दस्य प्रयोगे विवक्षितार्थनिर्णयार्थमुपकारीणि संयोगादीनि चतुर्दश कारणानि भर्तृहरिणा वाक्यपदीये द्वयोः कारिकयोः संगृहीतानि । (वा.२. ३१५, ३१६) तानि निर्दिश्य लघुमञ्जुषायां नागेशः लिखति 'अत्र सामर्थ्यमेवैकं मुख्यं निर्णायकम्, संयोगादयः तद्व्यञ्जकः प्रपञ्चः, तैः सामर्थ्यस्यैवाभिव्यक्तेः'।*

IV. 'निपात एकाजनाङ्'(१.१.१४) इति सूत्रे दीपिकायां 'गुणभूतस्य हलः सनः कित्त्वातिदेशे न भवति संख्याविशेषस्य विवक्षा' अत्र नागेशः 'विधेयविशेषणं विवक्षितमनुवाद्यविशेषणमविवक्षितमिति मीमांसकमर्यादैव ज्यायसी, भाष्यसंमता चेतीदं चिन्त्यम् । वाक्यपदीये तृतीयकाण्डे जातिसमुद्देशे प्रसक्तानुप्रसक्त इति संख्याविवक्षाऽविवक्षाविषयः उपक्षिप्तः, अनयैव सर्वशास्त्रसंमतमीमांसकमर्यादाप्रतीपया सरण्या निर्णयपथं प्रापितः ।'

V. सर्वनामसंज्ञासूत्रे (१.१.२७) भाष्ये 'एतेषां चापि शब्दानां यो विषयः ... सर्वनामकार्यं प्राप्नोति' इत्यत्र दीपिकायां भर्तृहरिः 'इदं न्यायविदो भाष्यकारस्याप्ययुक्तमिव दृश्यते' इति महाभाष्यकारं तिरस्करोति । नागेशः महाभाष्यं समर्थयते ।

VI. तत्रैव सूत्रभाष्ये अन्ततः 'उदाहरणमात्रम्' इति महाभाष्यप्रतीकं गृहीत्वा भर्तृहरिः 'भाष्यकारस्याप्युदाहरणमात्रमन्यान्यपि संनिवेशाश्रयाणि कार्याणि विद्यन्ते भावत्यमिति मा भूत्' इति महाभाष्य-

---

* [Note of the editor:] See *Vākyapadīya* (ed. K. V. Abhyankar and V. P. Limaye, Poona 1965), Appendix III, p. 233.

कारस्य न्यूनतां दर्शयति । नागेशो ऽत्र 'आदिपदसंग्राह्यमित्यर्थः' इति भाष्यन्यूनतां परिहरति ।

नागेशः एतानि खण्डनानि कैयटेन प्रदीपटीकायां निर्दिष्टानि मतान्यभिलक्ष्य प्रस्तौति । साक्षाद्दीपिकायां भर्तृहरिं वा नामग्राहं नैव गृह्णाति । परं भर्तृहरिकृतां दीपिकां नागेशः निश्चप्रचं जानीते । यतः प्रत्याहाराह्निकान्ते सः स्वभाष्यटीकायामुद्द्योते 'अत एवैतत्प्रतीकमुपादाय हरिणास्याक्षरसमाम्नायस्य ... इति व्याख्यातम्' इति नामग्राहं भर्तृहरिमुल्लिखति । अव्ययीभावश्चेति सूत्र (१.१.४१) टीकान्ते 'इति मतं हरिटीकायां स्पष्टं' इत्युल्लिख्य तन्मतं भाष्यविरुद्धमिति तिरस्करोति । नामग्राहं निर्दिष्टौ एतौ द्वौ विषयौ सांप्रतमुपलब्धायां दीपिकायां मनागिवान्यथानुपूर्व्या उपलभ्येते ।

उपाध्यायः तत्रभवान् कैयटः स्वटीकाया उपक्रमे एव प्रतिजानीते 'तथापि हरबद्धेन सारेण ग्रन्थसेतुना । क्रममाणः शनैः पारं तस्य प्राप्तास्मि पङ्गुवत् ॥' इति । अतः सः सर्वत्र भर्तृहरिमतमाश्रयति, प्रायशः समर्थयते च । यन्मतं तस्यानभिमतं तत्र मौनमवलम्ब्योदास्ते । नागेशस्तु मुनित्रयं तत्रापि महाभाष्यकारं भगवन्तं पतञ्जलिं परमं प्रमाणं मन्वानः कदाचिदपि भाष्यकारस्य खण्डनम्, उपहासं, तिरस्कारं वा न स्वप्नेऽपि सोढुं शक्नुयात् । या श्रद्धा नागेशस्य त्रिषु मुनिषु प्रायशः, स्वल्पया न्यूनाधिकभेदकणिकया सैव प्राचीनपरंपराप्रवाहमग्नानां समेषां विदुषाम् । दीपिकाकृता श्रीमता भर्तृहरिणा बहुत्र महाभाष्यकारमतानि स्वारुचिं प्रदर्श्य निरस्तानि । परम् 'इग्यणः संप्रसारणम्' (१.१.४५) इति सूत्रविवरणे 'आलस्यात्तु सकृदुच्चारितम्' इति शास्त्रविनोदमातन्वन् सूत्रकारमप्युपहसतीव ।

इत्थंकारं सूत्रकृदुपहासः, महाभाष्यविरोधः, सर्वशास्त्रसंमत-सिद्धान्तविरोधः वृथाप्रपञ्चः इत्यादयो दोषाः तत्रभवता नागेशेन परं-परायां पण्डितमण्डल्या च नैकत्र भर्तृहरिकृतौ साक्षात्कृताः । अन्येऽपि केचन दोषाः दृढशास्त्रसंस्कारसंस्कृतमतीनां प्राचीनविदुषां चेतांसि दुःखाकुर्वन्ति ।

अनुज्झितार्थसंबन्धः प्रबन्धः शास्त्रमुच्यते । इति हि शास्त्र-सामान्यलक्षणम् । पुराणसदृशी शिथिला बहुविस्तारविस्तीर्णा रचना भर्तृहरिकृतावुपलभ्यते । तत्र वाक्यपदीयकारिकासु पञ्चविधाः कारिकाः संकीर्णा उपलभ्यन्ते I प्रस्तुतार्थाः प्रसन्नाः II प्रस्तुतार्थाः अप्रसन्नाः III प्रसक्तानुप्रसक्तार्थाः प्रसन्नाः IV प्रसक्तानुप्रसक्तार्थाः अप्रसन्नाः V अर्थवादपराः ।

अतः भर्तृहरिग्रन्थमधीयानाः धीराः सक्तुमिव तितउना पुनन्तः कारिकाः, सूक्ष्मया बुद्ध्या अन्विष्यान्विष्य कासुचन एव कारिकासु परिष्कृतं शास्त्रत्वं द्रढयितुं प्रकल्पेरन् न सर्वासु । तत्र प्रथमे काण्डे आहत्य एकशतं पञ्चपञ्चाशत् कारिकाः सांप्रतमुपलभ्यन्ते । तत्र प्रायः अशीतिः कारिकाः शास्त्रबुद्धितितउना कृते पवनसंस्कारे शास्त्रत्वं विन्देरन् । अवशिष्टानामप्रस्तुतत्वम् अर्थवादरूपता वा अङ्गीकर्तव्या आपद्येत ।

कासांचन कारिकाणां तदन्तर्निहितपदानां वा समीचीनम् अभिप्रायमाविष्कर्तुं स्वयं स्वोपज्ञटीकापि अनलंभविष्णुः, तत्का कथा अन्येषामभ्यासकवशकानाम् । 'अर्थप्रवृत्तितत्त्वानाम् ...' (१ .१३) इत्यस्य षडर्थविवरणानि स्वोपज्ञटीकायां प्रदत्तानि, तावद्भिरपि न विदुषां सन्तोषः । एवमेव 'उपकारः स यत्रास्ति ...' (३.३.५) इति

कारिकाविवरणे हेलाराजः नागेशश्च कथं प्रयतेते, कारिकाकर्तुः निगूढमभिप्रायमाविष्कर्तुं कीदृशं महान्तं प्रयासमवलम्बेते तदिदम् अपरोक्षं प्रेक्षावताम् । एतादृशीं निगूढां संदेहकारिणीम् अबोधिकामत एवाप्रसन्नां रचनाशैलीमयं ग्रन्थकारः क्रियासमभिहारेण समाश्रयति इति संभवति प्राचीनपरंपराग्रहः ।

ग्रन्थकारोऽयं नितरां सूक्ष्मान् गूढांश्च विमर्शान् यथा वैदिकान् तथैव अवैदिकानपि संगृह्णाति यथायथं समर्थयते चापि । स्र्वेषु वैदिकेषु अवैदिकेषु चागमदर्शनेषु समानमादरभावं दधानोऽयं द्वितीय-काण्डान्ते वस्तुतत्त्वं जिज्ञासमानानभ्यासकान् समानादरभावफलं बोधयति, समर्थयते च —

प्रज्ञा विवेकं लभते भिन्नैरागमदर्शनैः ।
कियद्वा शक्यमुन्नेतुं स्वतर्कमनुधावता ॥ २.४८६
तत्तदुत्प्रेक्षमाणानां पुराणैरागमैर्विना ।
अनुपासितवृद्धानां विद्या नातिप्रसीदति ॥ २.४८७

वस्तुतो विचार्यमाणे वाक्यपदीयकर्ता भर्तृहरिरत्यन्तं प्रतीपत्वेन आभासमानयोः द्वयोः वैदिकावैदिकपरम्परयोः गङ्गायमुनयोरिव संगमः, पारावारयोस्तीरयोः सेतुः, समेषां विदुषां वैदुष्यसारः इत्येवानतिरिक्तं वचः, अत एव वाक्यपदीयीयाः बहवः संदर्भाः खण्डनार्थं मण्डनार्थं समर्थनार्थं वा विविधेषु शास्त्रग्रन्थेषु निर्दिष्टा उपलभ्यन्ते । तथापि शब्दविशेषप्रामाण्योपहता चिराय क्षुण्णं वर्त्म अनुसरन्ती वैदिकशास्त्रपरंपरा विविधेषु विचारेषु समानमादरभावं समर्थयमानममुं वाक्यपदीयकर्तारं स्वकीयमित्यनुमन्तुं न जातुचिद्

अधृष्णोत्, प्रत्युत 'अयं बाह्यः' 'प्रच्छन्नबौद्धः' इत्येव समर्थयांचक्रे ( प्रा. का. वा. अभ्यंकर – आचार्य वि. प्र. लिमये संपादिते पुणे विद्यापीठ-प्रकाशिते १९६५ प्रस्तावनायां पृष्ठं VI) ।

यद्यप्यादौ निर्दिष्टाः केचन दोषा ग्रन्थान्तरेषु बहुषु सन्ति, तथापि परंपरया ते ग्रन्थाः

गुणदोषौ बुधो गृह्णन् इन्दुक्ष्वेडाविवेश्वरः ।
शिरसा श्लाघते पूर्वं परं कण्ठे नियच्छति ॥

इतीमां बुधबुद्धिमवलम्ब्य स्वकीयत्वेनाभ्युपगताः । परमन्ततो निर्दिष्टः दोषः तत्रभवतः भर्तृहरेः सर्वान्दोषान्, महिष्ठान् गुणानप्यतिशेते येन सः प्राचीनशास्त्रपरंपरायां नातीवादरभाजनमित्येव वक्तुं सांप्रतमिति प्रतीमः ।

'बुद्धेः फलमनाग्रहः' एतादृशि बहूनि सुभाषितवचांसि विद्वांसः प्रस्तुवन्ति, क्वचनाभिनन्दन्त्यपि । तेनैव कारणेन श्रीमान् भर्तृहरिः ममापि मतौ महिष्ठमादरभाजनम् । परं परंपरा किमित्युदास्ते इत्यन्विष्यन्नहं प्रतिनिधिरूपेण नागेशं पर्यैक्षिषि, अन्यानपि विदुषः आपाततः पर्यालोचये । तावता मम बुद्धौ ये विचारतरङ्गाः, तान्विदुषां पुरतः स्थापयितुमयमुद्यमः । यतो ममेदं मतं केवलं संभवरूपमनुमानं मन्थरायमाणमेव अतः तत्प्रमाणपूतमन्यथा वा तन्निर्जये विद्वांस एव प्रभवन्ति ॥